कदा निलिम्प निर्झरी निकुंज कोटरे वसन् विमुक्त दुर्मतिः सदा शिरः स्थमंजलिं वहन्।
विलोल लोल लोचनो ललामभाल लग्नकः शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम्।13।
इमं हि नित्यमेव मुक्त मुत्तमोत्तमं स्तवं पठन्स्मन्ब्रवन्नरो विशुद्धिमेति सन्ततम्।
हरे गुरौ सुभक्ति माशु याति नान्यथा गतिं विमोहनं हि देहिनां सुशंकरस्य चिन्तनम्।14।
पूजावसान समये दशवक्त्रगीतं यः शम्भुपूजन परं पठति प्रदोषे।
तस्य स्थिरां रथगजेन्द्र तुरंगयुक्तां लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः।15।

इति श्री रावणकृतं शिव ताण्डवस्तोत्रं सम्पूर्णम्

शिवसहस्रनाम स्तोत्र

सूत उवाच

श्रूयतां भो ऋषिश्रेष्ठा येन तुष्टो महेश्वरः। तदहं कथयाम्यद्य शैवं नामसहस्रकम्।1।

विष्णुरुवाच

शिवो हरो मृडो रूद्रः पुष्करः पुष्पलोचनः। अर्थिगम्यः सदाचारः शर्वः शम्भुर्महेश्वरः।2।
चन्द्रापीडश्चन्द्र मौलिर्विश्वं विश्वम्भरेश्वरः। वेदान्तसारसंदोहः कपाली नीललोहितः।3।
ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता गणेश्वरः। अष्टमूर्तिर्विश्वमूर्ति स्त्रिवर्गस्वर्ग साधनः।4।
ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः। वामदेवा महादेवः पटुः परिवृढो दृढः।5।
विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः। सर्व प्रमाण संवादी वृषांको वृषवाहनः।6।
ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतनः।
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः।7।
कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः। उन्नघ्रः पुरूषो जुष्यो दुर्वासाः पुरशासनः।8।
दिव्यायुधः स्कन्दगुरूः परमेष्ठी परात्परः। अनादिमध्यनिधनो गिरीशो गिरिजाधवः।9।
कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः। समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधी।10।
विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः। धर्मधाम क्षमाक्षेत्रं भगवान भगनेत्रभित्।11।
उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्त : परंतपः। दाता दयाकरो दक्षः कपर्दी कामशासनः।12।
श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः। लोककर्ता मृगपतिर्महाकर्ता महौषधिः।13।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः। नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी।14।

सोमपोऽमृतपः सौम्यो महातेजा महाद्युतिः। तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः।।15।

अजातुशत्रुरालोकः सम्भाव्यो हव्यवाहनः। लोककरो वेदकरः सूत्रकारः सनातनः।।16।

महर्षिकपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः। पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिकृत्सुधीः।।17।

धातृधामा धामकरः सर्वगः सर्वगोचरः। ब्रह्मसृग्विश्व सृक्सर्गः कर्णिकारप्रियः कविः।।18।

शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः। गंगाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः।।19।

विजितात्मा विधेयात्मा भूतवाहनसारथिः। सगणो गणकायश्च सुकीर्तिश्छिन्न संशयः।20।

कामदेवः कामपालो भस्मोद्धूलितविग्रहः। भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः।21।

समावर्तोऽनिवृत्तात्मा धर्मपुंजः सदाशिवः। अकल्मषश्चतुर्बाहुर्दरावासो दुरासदः।22।

दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः। अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्धनः।23।

शुभांगो लोकसारंगो जगदीशो जनार्दनः। भस्मशुद्धिकरो मेरूरोजस्वी शुद्धविग्रहः।24।

असाध्यः साधुसाध्यश्च भृत्यमर्कट रूपधृक्। हिरण्यरेताः पौराणो रिपुजीवहरो बली।25।

महाह्रदो महागर्तः सिद्धवृन्दारवन्दितः। व्याघ्रचर्माम्बरो व्याली महाभूतो महानिधिः।26।

अमृताशोऽमृतवपुः पांचजन्यः प्रभंजनः। पंचविंशतितत्त्वस्थः पारिजातः परावरः।27।

सुलभः सुव्रतः शूरो ब्रह्मवेदनिधिर्निधिः। वर्णाश्रमगुरूर्वर्णी शत्रुजिच्छत्रुतापनः।28।

आश्रमः क्षपणः क्षामो ज्ञानवान चलेश्वरः। प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः।29।

धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः। सत्यः सत्यपरोऽदीनो धर्मांगो धर्मसाधनः।30।

अनन्तदृष्टिरान्दो दण्डो दमयिता दमः। अभिवाद्यो महामायो विश्वकर्म विशारदः।31।
वीतरागो विनीतात्मा तपस्वी भूतभावनः। उन्मत्तवेषः प्रच्छन्नो जितकामोऽजितप्रियः।32।
कल्याणप्रकृतिः कल्पः सर्वलोक प्रजापतिः। तरस्वी तारको धीमान् प्रधानः प्रभुरव्ययः।33।
लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः। वेदशास्त्रार्थ तत्वज्ञोऽनियमो नियताश्रयः।34।
चन्द्रः सूर्यः शनिः केतुर्वरांगो विद्रुमच्छविः। भक्ति वश्यः परब्रह्म मृगवाणार्पणोऽनघः।35।
अद्रिरद्रयालयः कान्तः परमात्मा जगद्गुरूः। सर्वकर्मालयस्तुष्टो मंगल्यो मंगलावृतः।36।
महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः। अहःसंवत्सरकरो व्याप्तिः प्रमाणं परमं तापः।37।
संवत्सरकरो मन्त्रप्रत्ययः सर्वदर्शनः। अजः सर्वेश्वरः सिद्धो महारेता महाबलः।38।
योगी योग्यो महातेजाः सिद्धि सर्वादिरग्रहः। वसुर्वसुमनाः सत्यः सर्वपापहरो हरः।39।
सुकीर्तिशोभनः श्रीमान् वेदांगो वेदविन्मुनिः। भ्राजिष्णुर्भोजनं भोक्त । लोकनाथो दुराधरः।40।
अमृतः शाश्वतः शान्तो वाणहस्तः प्रतापवान्। कमण्डलुधरो धन्वी अवाङ्मनसगोचरः।41।
अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः। कालयोगी महानादो महोत्साहो महाबलः।42।
महाबुद्धिर्महावीर्यो भूतचारी पुरंदरः। निशाचरः प्रेतचारी महाशक्ति र्महाद्युतिः।43।
अनिर्देश्यवपुः श्रीमान् सर्वाचार्यमनोगतिः। बहुश्रुतोऽमहामायो नियतात्मा ध्रुवोऽध्रुवः।44।
ओजस्तेजोद्युतिधरो जनकः सर्वशासनः। नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रकाशकः।45।

स्पष्टाक्षरो बुधो मन्त्रः समानः सारसम्प्लवः। युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः।46।

इष्टोऽविशिष्टः शिष्टेटः सुलभः सारशोधनः। तीर्थरूपस्तीर्थनामा तीर्थदृश्यस्तु तीर्थदः।47।

अपांनिधिरधिष्ठानं दुर्जयो जयकालवित्। प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः।48।

विमोचनः सुरगणो विद्येशो विन्दुसंश्रयः। बालरूपोऽबलोन्मत्तोऽविकर्ता गहनो गुहः।49।

करणं कारणं कर्ता सर्वबन्धविमोचनः। व्यवसायो व्यवस्थानः स्नादो जगदादिजः।50।

गुरूदो ललितोऽभेदो भावात्माऽऽत्मनि संस्थितः। वीरेश्वरो वीरभद्रो वीरासनविधिर्विराट्।51।

वीरचूडामणिर्वेत्ता चिदानन्दो नदीधरः। आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः।52।

वालखिल्यो महाचापस्तिग्मांशुर्बधिरः खगः। अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः।53।

मघावान्कौशिकौ गोमान्विरामः सर्वसाधनः। ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत्।54।

अमोघदण्डो मध्यस्थो हिरण्यो ब्रह्मवर्चसी। परमार्थः परो मायी शम्बरो व्याघ्रलोचनः।55।

रूचिर्विरंचिः स्वर्बन्धुर्वाचस्पतिरहर्पतिः। रविर्विरोचनः स्कन्दः शास्ता वैवस्वतो यमः।56।

युक्ति रून्नतकीर्तिश्च सानुरागः परंजयः। कैलासाधिपतिः कान्तः सविता रविलोचनः।57।

विद्वत्तमो वीतभयो विश्वभर्ता निवारितः। नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः।58।

दूरश्रवा विश्वसहो ध्येयो दुःस्वप्न नाशनः। उत्तारणो दुष्कृतिहा विज्ञेयो दुस्सहोऽभवः।59।

अनादिभूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः। विश्वगोप्ता विश्वकर्ता सुवीरो रूचिरांगदः।60।

जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः। वसिष्ठः कश्यपो भानुर्भीमो भीमपराकर्मः।61।

प्रणवः सत्पथाचारो महाकोशो महाधनः। जन्माधिपो महादेवः सकलागमपारगः।62।
तत्वं तत्वविदेकात्मा विभुर्विश्वविभूषणः। ऋषिर्ब्राह्मण ऐश्वर्यजन्ममृत्युजरातिगः।63।
पंचयज्ञ समुत्पत्तिर्विश्वेशो विमलोदयः। आत्मयोनिरनाद्यन्तो वत्सलो भक्तलोकधृक्।64।
गायत्रीवल्लभः प्रांशुर्विश्वावाशः प्रभाकरः। शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा।65।
अमोघोऽरिष्टनेमिश्च कुमुदो विगतज्वरः। स्वयं ज्योतिस्तनुज्योतिरात्म ज्योतिरचंचलः।66।
पिंगलः कपिलश्मश्रुर्भाल नेत्रस्त्रयीतनुः। ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः।67।
भगो विवस्वानादित्यो योगपारो दिवस्पतिः। कल्याणगुणनामा च पापहा पुण्यदर्शनः।68।
उदाकीर्तिरुद्योगी सद्योगी सदसन्मयः। नक्षत्रमाली नाकेशः स्वाधिष्ठानपदाश्रयः।69।
पवित्रः पापहारी च मणिपूरो नभोगतिः। हृत्पुण्डरीकमासीनः शक्रः शान्तो वृषाकपिः।70।
उष्णो गृहपतिः कृष्णः समर्थोऽनर्थनाशनः। अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः।71।
ब्रह्मगर्भो ब्रहदगर्भो धर्मधेनुर्धनागमः। जगद्धितैषी सुगतः कुमारः कुशलागमः।72।
हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः अरागो नयनाध्यक्षो विश्वामित्रो धनेश्वरः।73।
ब्रह्ममज्योतिर्वसुधामा महाज्योतिरनुत्तमः। मातामहो मातरिश्वा नभस्वान्नागहारधृक्74।
पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः। निरावरणनिर्वारो वैरंच्यो विष्टरश्रवाः।75।
आत्मभूर निरुद्धोऽत्रिर्ज्ञान मूर्तिर्महायशाः। लोकवीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः।76।
व्यालाकल्पो महाकल्पः कल्पवृक्षः कलाधरः। अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः।77।
आयुः शब्दपतिर्वेगी प्लवनः शिखिसारथिः। असंसृष्टोऽतिथिः शक्रप्रमाथी पादपासनः।78।
वसुश्रवा हव्यवाहः प्रतप्तो विश्वभोजनः। जप्यो जरादिशमनो लोहितात्मा तनूनपात्।79।
बृहदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा निदाघस्तपनो मेघः स्वक्षः परपुरंजयः।80।

सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः। वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः।81।

अंगिरा गुरूरात्रेयो विमलो विश्ववाहनः। पावनः सुमितिर्विद्वांस्त्रैविद्यो वरवाहनः।82।

मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः। जमदग्निर्बलनिधिर्विगालो विश्वगालवः।83।

अघोरोऽनुत्तरो यज्ञः श्रेष्ठो निःश्रेयसप्रदः। शैलो गगनकुन्दाभो दानवारिररिंदमः।84।

रजनी जनकश्चारूर्निः शल्यो लोकशल्यधृक्। चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः।85।

आम्नायोऽथ समाम्नायस्तीर्थ देव शिवालयः। बहुरूपो महारूपः सर्वरूपश्चराचरः।86।

न्याय निर्मायको न्यायी न्यायगम्यो निरंजनः। सहस्त्रमूर्द्धा देवेन्द्रः सर्वशस्त्र प्रभंजनः।87।

मुण्डो विरूपो विक्रान्तो दण्डी दान्तो गुणोत्तमः। पिंगलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः।88

सहस्त्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक्। पद्मासनः परं ज्योतिः पारम्पर्य्यफलप्रदः।89।

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः। परावरज्ञो वरदो वरेण्यश्च महास्वनः।90।

देवासुर गुरूर्देवो देवासुर नमस्कृतः। देवासुर महामित्रो देवासुर महेश्वरः।91।

देवासुरेश्वरो दिव्यो देवासुरमहाश्रयः। देवदेवमयोऽचिन्त्यो देवदेवात्म सम्भवः।92।

सद्योनिर सुरव्याघ्रो देवसिंहो दिवाकरः। विबुधाग्र चरश्रेष्ठः सर्वदेवोत्त मोत्तमः।93।

शिवज्ञानरतः श्रीमांछिखि श्रीपर्वतप्रियः। वज्रहस्तः सिद्धखड्गो नरसिंहनिपातनः।94।

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः। नन्दी नन्दीश्वरोऽनन्तो नग्नवृतधरः शुचिः।95।

लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युवावहः। स्वधर्मा स्वर्गतः स्वर्गस्वरः स्वरमयस्वनः।96।

वाणाध्यक्षो बीजकर्ता धर्मकृद्धर्मसम्भवः। दम्भोऽलोभोऽर्थविच्छम्भुः सर्वभूतमहेश्वरः।97।

श्मशाननिलयस्त्रयक्षः सेतुरप्रतिमाकृतिः। लोकोत्तरस्फुटा लोकस्त्रयम्बको नागभूषणः।98।

अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः। हीनदोशोऽक्षयगुणो दक्षारिः पूषदन्तभित्।99।

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः। अकालः सकलाधारः पाण्डुराभो मृडो नटः।100।

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः। सामगेयप्रियोऽक्रूरः पुण्यकीर्तिरनामयः।101।

मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः। जीवितान्तकरो नित्यो वसुरेता वसुप्रदः।102।

सद्गतिः सत्कृतिः सिद्धि सज्जातिः खलकण्टकः। कलाधरो महाकालभूतः सत्यपरायणः।103।

लोकलावण्यकर्ता च लोकोत्तरसुखालयः। चन्द्रसंजीवनः शास्ता लोकगूढो महाधिपः।104।

लोकबन्धुर्लोकनाथः कृतज्ञः कीर्तिभूषणः। अनपायोक्षरः कान्तः सर्वशस्त्रभृतां वरः।105।

तेजोमयो द्युतिधरो लोकानामग्रणीरणुः। शुचिस्मितः प्रसन्नात्मा दुर्जेयो दुरतिक्रमः।106।

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः। तुम्बवीणो महाकोपो विशोकः शोकनाशनः।107।

त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः। अव्यक्त लक्षणो देवो व्यक्ता व्यक्तो विशाम्पतिः।108।

वरशीलो वरगुणः सारो मानधनो मयः। ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः।109।

वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः। कैलासशिखरावासी सर्वावासी सदागतिः।110।

हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः। सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः।111।

देवप्रियो देवनाथो देवज्ञो देवचिन्तकः। विषमाक्षो विशालाक्षो वृषदो वृषवर्धनः।112।

निर्ममो निरहंकारो निर्मोहो निरूपद्रवः। दर्पहा दर्पदो दृप्तः सर्वर्तुपरिवर्तकः।113।

सहस्रजित् सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः। भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः।114।

अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः। निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्दनः।115।

सत्त्ववान्सात्त्विकः सत्यकीर्तिः स्नेहकृतागमः। अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत्।116।

सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः। नन्दिस्कन्धधरो धुर्यः प्रकटः प्रीतिवर्धनः।117।

अपराजितः सर्वसत्त्वो गोविन्दः सत्त्ववाहनः। अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः।118।

वाराहश्रृंगधृक्छृंगी बलवानेकनायकः। श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेककृत्।119।

श्रीवत्सलशिवारम्भः शान्तभद्रः समो यशः। भूशयो भूषणो भूतिर्भूतकृद् भूतभावनः।120।

अकम्पो भक्तिकायस्तु कालहा नीललोहितः। सत्यव्रत महात्यागी नित्यशान्तिपरायणः।121।

परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः। शुभदः शुभकर्ता च शुभनामा शुभः स्वयम्।122।

अनर्थितोऽगुणः साक्षी ह्यकर्ता कनकप्रभः। स्वभावभद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः।123।

शिखण्डी कवची शूली जटी मुण्डी च कुण्डली।

अमृत्युः सर्वदृक् सिंहस्तेजो राशिर्महामणिः।124।

असंख्येयोऽप्रमेयात्मा वीर्यवान् वीर्यकोविदः।
वैद्यश्चैव वियोगात्मा परावरमुनीश्वरः।125।
अनुत्तमो दुराधर्षो मधुरप्रियदर्शनः।
सुरेशः शरणं सर्वः शब्दब्रह्म सतां गतिः।126।
कालपक्षः कालकालः कंकणीकृतवासुकिः।
महेश्वासो महीभर्ता निष्कलंको विशृंखलः।127।
द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः।
विश्वत संवृतःस्तुत्यो व्यूढोरस्को महाभुजः।128।
सर्वयोनिर्निरातंको नरनारायणप्रियः।
निर्लेपो निष्प्रपंचात्मा निर्व्यंगो व्यंगनाशनः।129।
स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरकुशः।
निवद्यमयोपायो विद्याराशी रसप्रियः।130।
प्रशान्तबुद्धिरक्षुण्णः संग्रही नित्यसुन्दरः।
वैयाघ्रधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः।131।
परमार्थगुरूर्दत्तः सूरिराश्रितवत्सलः।
सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः।132।

शिवसहस्रनाम स्तोत्र सम्पूण्रम्

शिव के पाँच आवरणों में स्थिति सभी देवताओं की स्तुति
तथा उनसे अभीष्ट पूर्ति एवं मंगल की कामना

उपमन्युरूवाच

स्तोत्रं वक्ष्यामि ते कृष्ण पंचावरणमार्गतः। योगेश्वरमिदं पुण्यं कर्म येन समाप्यते।1।

जय जय जगदेकनाथ शम्भो प्रकृति मनोहर नित्य चित्स्वभाव।

अतिगत कलुष प्रपंचवाचामपि मनसां पदवीमतीत तत्त्वम्2।

स्वभाव निर्मलाभोग जय सुन्दर चेष्टित। स्वात्मतुल्य महाशक्ते जय शुद्ध गुणार्णव।3।

अनन्त कान्ति सम्पन्न जया सदृशविग्रह। अतर्क्य महिमाधार जयानाकुल मंगल।4।

निरंजन निराधार जय निष्कारणोदय। निरंतर परानन्द जय निर्वृत्ति कारण।5।

जयाति परमैश्वर्य जयाति करूणास्पद। जय स्वतंत्र सर्वस्व जया सदृश वैभव।6।

जयावृत महाविश्व जयनावृत केनचित्। जयोत्तर समस्तस्य जयात्यन्त निरूत्तर।7।

जयाद्भुत जयाक्षुद्र जयाक्षत जयाव्यय। जयामेय जयामाय जयाभव जयामल।8।

महाभुज महासार महागुण महाकथ। महाबल महामाय महारस महारथ।9।

नमः परमदेवाय नमः परमहेतवे। नमः शिवाय शान्ताय नमः शिवतराय ते।10।

त्वदधीनमिदं कृत्सनं जगद्धि ससुरासुरम्11।

अतस्त्व द्विहितामाज्ञां क्षमते कोऽतिवर्तितुम्।12।

अयं पुनजनो नित्य भवदेक समाश्रियः। भवानतोऽनुग्रह्यास्मै प्रार्थितम सम्प्रयच्छतु।13।

जयाम्बिके जगन्मातर्जय सर्व जगन्मयि। जयानवधिकैश्वर्ये जयानपम विग्रहे।14।

जय वांगमनसातीते जयाचिद् ध्वान्त भंजिके। जय जन्म जराहीने जय कालोत्तरोत्तरे ।15।

जयानेक विधानस्थे जय विश्वेश्वर प्रिये। जय विश्व सुराराध्ये जय विश्वविजृम्भिणि ।16।

जय मंगल दिव्यांगि जय मंगल दीपिके। जय मंगल चारित्रे जय मंगल दायिनि ।17।

नमः परमकल्याण गुण संचय मूर्तये। त्वत्तः खल समुत्पन्नं जगत्त्वय्येव लीयते ।18।

त्वद्विनातः फलं दातुमीश्वरोऽपि न शक्रुयात। जन्म प्रभृति देवेशि जनोऽयं त्वदुपाश्रितः ।19।

अतोऽस्य तव भक्तस्य निर्वर्तय मनोरथं। पंचवक्त्रो दशभुजः शुद्ध स्फटिक संनिभः ।20।

वर्ण ब्रह्मकलादेहो देवः सकलनिष्कलः। शिवमूर्तिसमारूढः शान्त्यतीतः सदाशिवः।

भक्त्या मयार्चितो मह्यं प्रार्थितं शं प्रयच्छतु ।21।

सदाशिवांकमारूढा शक्तिरिच्छा शिवाह्वया। जननी सर्वलोकानां प्रयच्छतु मनोरथम् ।22।

शिवयोर्दयितौ पुत्रौ देवौ हेरम्बषण्मुखौ। शिवानुभावौ सर्वज्ञौ शिवज्ञानामृताशिनौ ।23।

तृप्तौ परस्परं स्निग्धौ शिवाभ्यां नित्यसत्कृतौ। सत्कृतौ च सदा देवौ ब्रह्माद्यैस्त्रिदशैरपि ।24।

सर्वलोकपरित्राणं कर्तुमभ्युदितौ सदा। स्वेच्छावतारं कुर्वन्तौ स्वांशभेदैरनेकशः ।25।

ताविमौ शिवयोः पार्श्वे नित्यमित्थं मयार्चितौ। तयोराज्ञां पुरस्कृत्य प्रार्थितं मे प्रयच्छताम् ।26।

शुद्धस्फटिक संकाश मीशानाख्यं सदाशिवम्। मूर्द्धाभिमानिनी मूर्तिः शिवस्य परमात्मनः ।27।

शिवार्चनरतं शान्तं शान्त्यतीतं खमास्थितम्। पंचाक्षरान्तिमं बीजं कलाभिः पंचभिर्युतम् ।28।

प्रथमावरणे पूर्वं शक्त्या सह समर्चितम्। पवित्रं परमं ब्रह्म पार्थितं मे प्रयच्छतु ।29।

बालसूर्यप्रतीकाशं पुरूषाख्यं पुरातनम्। पूर्ववक्त्राभिमानं च शिवस्य परमेष्ठिनः ।30।

शान्त्यात्मकं मरूत्संस्थं शम्भोः पादार्चनेरतम्। प्रथमं शिवबीजेषु कलासु च चतुष्कलम्।31।
पूर्वभागे मया भक्त्या शक्त्या सह समर्चितम्। पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।32।
अंजनादि प्रतीकाशमघोरं घोरविग्रहम्। देवस्य दक्षिणं वक्त्रं देव देवपदार्चकम्।33।
विद्यापदं समारूढं वह्निमण्डल मध्यगम। द्वितीयं शिवबीजेषु कलास्वष्टकलान्वितम्।34।
शम्भोर्दक्षिण दिग्भागे शक्त्या सह समर्चितम्। पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।35।
कुंकुमक्षोद संकाशं वामाख्यं वरवेषधृक्। वक्त्रमुत्तरमीशस्य प्रतिष्ठायां प्रतिष्ठितम्।36।
वारिमण्डल मध्यस्थं महादेवार्चने रतम्। तुरीयं शिवबीजेषु त्रयोदशकलान्वितम्।37।
देवस्योत्तरदिग्भागे शक्त्या सह समर्चितम्। पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।38।
शंखकुन्देन्दुधवलं सद्याख्यं सौम्यलक्षणम्। शिवस्य पश्चिमं वक्त्रं शिवपादार्चने रतम्।39।
निवृत्तिपदनिष्ठं च पृथिव्यां समवस्थितम्। तृतीयं शिवबीजेषु कलाभिश्चाष्टभिर्युतम्।40।
देवस्य पश्चिमे भागे शक्त्या सह समर्चितम। पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु।41।
शिवस्य तु शिवायाश्च ह्न्मूर्ती शिवभाविते। तयोराज्ञां पुरूस्कृत्य ते मे कामं प्रयच्छताम्।42।
शिवस्य च शिवायाश्च शिखामूर्ती शिवााश्रिते। सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।43।
शिवस्य च शिवायाश्च वर्मणा शिवाभाविते। सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।44।
शिवस्य च शिवायाश्च नेत्रमूर्ती शिवाश्रिते। सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।45।
अस्त्रमूर्ती च शिवयोर्नित्यमर्चनतत्परे। सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम्।46।
वामो ज्येष्ठस्तथा रूद्रः कालो विकरणस्तथा। बलो विकरणश्चैव बलप्रमथनः परः।47।

सर्वभूतस्य दमनस्ता दृशाश्चाष्टशक्तयः। प्रार्थितं मे प्रयच्छन्तु शिवयोरेव शासनात्।48।
अथानन्तश्च सूक्ष्मश्च शिवश्चाप्यकनेत्रकः। एकरूद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिकः।49।
तथाष्टौ शक्तयस्तेषां द्वितीयावरणेऽर्चिताः। ते मे कामं प्रयच्छन्तु शिवयोरेव शासनत्।50।
भवाद्या मूर्तयश्चाष्टो तासमपि च शक्तयः। महादेवादयश्चान्ये तथैकादशमूर्तयः।51।
शक्तिभिः सहिताः सर्वे तृतीयावरणे स्थिताः। सत्कृत्य शिवयोराज्ञां दिशन्तु फलमीप्सितम्।52।
वृषराजो महातेजा महामेघसमस्वनः। मेरूमन्दर कैलासहिमाद्रिशिखरोपमः।53।
सिताभ्रशिखराकारककुदा परिशोभितः। महाभोगीन्द्रकल्पेन वालेन च विराजितः।54।
रक्तास्यशृंगचरणो रक्तप्रायविलोचनः। पीवरोन्नतसर्वांगः सुचारूगमनोज्जवलः।55।
प्रशस्तलक्षणः श्रीमान् प्रज्वलन्मणिभूषणः। शिवप्रियः शिवासक्तः शिवयोर्ध्वजवाहनः।56।
तथा तच्चरणन्यास पावितापरविग्रहः। गोराजपुरूषः श्रीमान श्रीमच्छूलवरायुधः।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु।57।
नन्दीश्वरो महातेजा नगेन्द्रतनयात्मजः। सनारायणकैर्देवैर्नित्यमभ्यर्च्य वन्दितः।58।
शर्वस्यान्तः पुरद्वारि सार्द्ध परिजनैः स्थितः। सर्वेश्वरसमप्रख्यः सर्वासुरविमर्दनः।59।
सर्वेषां शिवधर्माणामध्यक्षत्वेऽभिषेचितः। शिवप्रियः शिवासक्त श्रीमच्छूलवरायुधः।60।
शिवाश्रितेषु संसक्तस्त्वनुरक्तश्च तैरपि। सत्कृत्य शिवयोराज्ञां स मे कामं प्रयच्छतु।61।
महाकालो महाबाहुर्महादेव इवापरः। महादेवश्रितानां तु नित्यमेवाभिरक्षतु।62।
शिवप्रियः शिवासक्तः शिवयोरर्चकः सदा। सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम्।63।
सर्वशास्त्रार्थ तत्वज्ञः शास्ता विष्णोः परा तनुः। महामोहात्मतनयो मधुमांसासवप्रियः।
तयोराज्ञा पुरस्कृत्य स मे कामं प्रयच्छतु।64।

ब्राह्मणी चैव माहेशी कौमारी वैष्णवी तथा। वाराही चैव माहेन्द्री चामुण्डा चण्डविक्रमा ।65।

एता वै मातरः सप्त सर्वलोकस्य मातरः। प्रार्थितं मे प्रयच्छन्तु परमेश्वरशासनात् ।66।

मत्तमातंगवदनो गंगोमाशंकरात्मजः। आकाशदेहो दिग्बाहुः सोमसूर्याग्निलोचनः ।67।

ऐरावतादिभिर्दिव्यैर्दिग्गजैर्नित्यमर्चितः। शिवज्ञानमदोद्भिन्नस्त्रिदशानामविघ्नकृत् ।68।

विघ्नकृच्चासुरादीनां विघ्नेशः शिवभावितः। सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ।69।

षण्मुखः शिवसम्भूतः शक्तिवज्रधरः प्रभुः। अग्नेश्च तनयो देवो ह्यपर्णातनयः पुनः ।70।

गंगायाश्च गणाम्बायाः कृत्तिकानां तथैव च। विशाखेन च शाखेन नैगमेयेन चावृतः ।71।

इन्द्रजिच्चेन्द्र सेनानीस्तारकासुरजित्तथा। शैलानां मेरुमुख्यानां वेधकश्च स्वतेजसा ।72।

तप्तचामीकरप्रख्यः शतपत्रदलेक्षणः। कुमारः सुकुमाराणां रूपोदाहरणं महात् ।73।

शिवप्रियः शिवासक्तः शिवपादार्चकः सदा। सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ।74।

ज्येष्ठा वरिष्ठा वरदा शिवयोर्यजने रता। तयोराज्ञां पुरस्कृत्य सा मे दिशतु कांक्षितम् ।75।

त्रैलोक्य वन्दिता साक्षादुल्काकारा गणाम्बिका। जगत्सृष्टिविवृद्ध्यर्थं ब्रह्मणाभ्यर्थिता शिवात् ।76।

शिवायाः प्रविभक्ताया भ्रुवोरन्तरनिस्सृता। दाक्षायणी सती मेना तथा हेमवती ह्युमा ।77।

कौशिक्याश्चैव जननी भद्रकाल्यास्तथैव च। अपर्णायाश्च जननी पाटलायास्तथैव च ।78।

शिवार्चनरता नित्य रूद्राणी रूद्रवल्लभा। सत्कृत्यं शिवयोराज्ञां सा मे दिशतु कांक्षितम् ।79।

चण्डः सर्वगणेशानः शम्भोर्वदनसम्भवः। सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ।80।

पिंगलो गणपः श्रीमान् शिवासक्तः शिवप्रियः। आज्ञया शिवयोरेव स मे कामं प्रयच्छतु ।81।

भृंगीशो नाम गणपः शिवाराधनतत्परः। प्रयच्छतु स मे कामं पत्युराज्ञापुरस्सरम् ।82।

वीरभद्रो महातेजा हिमकुन्देन्दुसंनिभः। भद्रकालीप्रियो नित्यम मातृणां चाभिरक्षिता ।83।

यज्ञस्य च शिरोहर्ता दक्षस्य च दुरात्मनः। उपेन्द्रेन्द्रयमादीनां देवानामंगतक्षकः।84।
शिवस्यानुचरः श्रीमान् शिवशासनपालकः। शिवयोः शासनादेव स मे दिशतु कांक्षितम्।85।
सरस्वती महेशस्य वाक्सरोजसमुद्भवा। शिवयोः पूजने सक्ता सा मे दिशतु कांक्षितम्।86।
विष्णोर्वक्षः स्थिता लक्ष्मीः शिवयो पूजने रता। शिवयोः शासनादेव सा मे दिशतु कांक्षितम्।87।
महामोटी महादेव्याः पादपूजारायणा। तस्या एव नियोगेन सा मे दिशतु कांक्षितम्।88।
कौशिकी सिंहमारूढा पार्वत्याः परमा सुता। विष्णोर्निद्रा महामाया महामहिषमर्दिनी।89।
निशुम्भशुम्भ संहर्त्री मधुमांसासवप्रिया। सत्कृत्य शासनं मातुः सा मे दिशतु कांक्षितम्।90।
रूद्रा रूद्रसमप्रख्याः प्रमथाः प्रथितौजसः। भूताख्याश्च महावीर्या महादेवसमप्रभाः।91।
नित्यमुक्ता निरूपमा निर्द्वन्दा निरूपप्लवाः। सशक्तयः सानुचराः सर्वलोकनमस्कृताः।92।
सर्वेषामेव लोकानां सृष्टिसंहरणक्षमाः। परस्परानुरक्ताश्च परस्परमनुव्रता।93।
परस्परमतिस्निग्धाः परस्परनमस्कृताः। शिवप्रियतमा नित्यं शिवलक्षणलक्षिताः।94।
सौम्या घोरास्तथा मिश्राश्चान्तरालद्वयात्मिकाः। विरूपाश्च सुरूपाश्च नानारूपधरास्तथा।95।
सत्कृत्य शिवयोराज्ञां ते मे कामं दिशन्तु वै। देव्याः प्रियसखीवर्गो देवीलक्षणलक्षितः।96।
सहितो रूद्रकन्याभिः शक्तिभिश्चाप्यनेकशः। तृतीयावरणे शम्भोर्भक्त्या नित्यं समर्चितः।97।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मंगलम्। दिवाकरो महेशस्य मूर्तिर्दीप्तसुमण्डलः।98।
अविकारात्मकश्चाद्यः एकः सामान्यविक्रयः।99।
असाधारण कर्मा च सृष्टिस्थितिलयकमात्। एवं त्रिधा चतुर्द्धा च विभक्तः पंचधा पुनः।100।
चतुर्थावरणे शम्भोः पूजितश्चानुगैः सह। शिवप्रयः शिवासक्तः शिवपादार्चने रतः।101।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मंगलम्। दिवाकरषडंगानि दीप्ताद्याश्चाष्टशक्तयः।102।
आदित्यो भास्करो भानू रविश्चेत्यनुपूर्वशः। अर्को ब्रह्मा तथा रूद्रो विष्णुश्चादित्यमूर्तयः।103।

ऊषा प्रभा तथा प्राज्ञा संध्या चेत्यपि शक्तय।104।

सोमादिकेतु पर्यन्ता ग्रहाश्च शिवभाविताः। शिवयोराज्ञया नुन्ना मंगलं प्रदिशन्तु मे ।105।

अथ वा द्वादशादित्यास्तथा द्वादश शक्तयः। ऋषयो देवगन्धर्वाः पन्नगाप्सरसां गणाः।106।

ग्रामण्यश्च तथा यक्षा राक्षसाश्च सुरास्तथा। सप्त सप्तगणाश्चैते सप्तच्छन्दोमया हयाः।107।

वालखिल्यादयश्चैव सर्वे शिवपदार्चकाः। सत्कृत्य शिवयोराज्ञां मंगलं प्रदिशन्तु मे।108।

ब्रह्माथ देवदेवस्य मूर्तिर्भूमण्डलाधिपः। चतुःषष्टिगुणैश्वर्यो बुद्धितत्त्वे प्रतिष्ठितः।109।

निर्गुणो गुणसंकीर्णस्तथैव गुणकेवलः। अविकारात्मको देवस्ततः साधारणः पुरः।110।

असाधरणकर्मा च सृष्टिस्थितिलयक्रमात्। एवं त्रिधा चतुर्द्धा च विभक्तः पंचधा पुनः।111।

चतुर्थावरणे शम्भोः पूजितश्च सहानुगैः। शिवप्रियः शिवासक्तः शिवपादार्चने रतः।112।

सत्कृत्य शिवयोराज्ञां स मे दिशतु मंगल्। हिरण्यगर्भो लोकेशो विराट् कालश्च पुरुषः।113।

सनत्कुमारः सनकः सनन्दश्च सनातनः। प्रजानां पतयश्चैव दक्षाद्या ब्रह्मसूनवः।114।

एकादश सपत्नीका धर्मः संकल्प एव च। शिवार्चनरताश्चैते शिवभक्तिपरायणाः।115।

शिवाज्ञावगशगाः सर्वे दिशन्तु मम् मंगलम्। चत्वारश्च तथा वेदाः सेतिहासपुराणकाः।116।

धर्मशास्त्राणि विद्याभिर्वैदिकीभिः समन्विताः। परस्पराविरुद्धार्थाः शिवप्रकृतिपादकाः।117।

सत्कृत्य शिवयोराज्ञां मंगलं प्रदिशन्तु मे। अथ रूद्रो महादेवः शम्भोमूर्तिर्गरीयसी।118।

वाह्नेयमण्डलाधीशः पौरुषेश्वर्यवान् प्रभुः। शिवाभिमानसम्पन्नो निर्गुणस्त्रिगुणात्मक।119।

केवलं सात्त्विकश्चापि राजसश्चैव तामसः। अविकाररतः पूर्वं ततस्तु समविक्रयः।120।

असाधाणकर्मा च सृष्टयादिकरणात्प्रथक्। ब्रह्मणोऽपि शिरश्छेता जनकस्तस्य तत्सुतः।121।

जनकस्तनयश्चापि विष्णोरपि नियामकः। बोधकश्च तयोर्नित्यमनुग्रहकरः प्रभुः।122।

अण्डस्यान्तबहिर्वर्ती रूद्रो लोकद्वयाधिपः। शिवप्रियः शिवासक्तः शिवपादार्चने रतः।123।

शिवयोस्थज्ञां पुरस्कृत्य स मे दिशतु मंगलम्। तस्य ब्रह्म षडंगानि विद्येशानां तथाष्टकम्।124।

चत्वारो मूर्तिभेदाश्च शिवपूर्वाः शिवार्चकाः। शिवो भवो हरश्चैव मृडश्चैव तथापरः।
शिवस्याज्ञां पुरस्कृत्य मंगलं प्रदिशन्तु मे।125।
अथ विष्णुर्महेशस्य शिवस्यैव परा तनुः। वारितत्त्वाधिपः साक्षादव्यक्त पदसंस्थितः।126।
निर्गुणः सत्त्वबहुलस्तथैव गुणकेवलः। अविकाराभिमानी च त्रिसाधारणविक्रयः।127।
असाधारणकर्मा च सृष्टयादिकरणात्पृथक्। दक्षिणांगभवेनापि स्पर्धमानः स्वयम्भुवा।128।
आद्येन ब्रह्मणा साक्षात्सृष्टः स्रष्टा च तस्य तु। अण्डस्यान्तर्बहिर्वर्ती विष्णुर्लोकद्वयाधिपः।129।
असुरान्तकश्चक्री शक्रस्यापि तथानुजः। प्रादुर्भूतश्च दशधा भृगुशापच्छलादिह।130।
भूभार निग्रहार्थाय स्वच्छयावातरत् क्षितौ। अप्रमेयबलो मायी मायया मोहयंजगत्।131।
मूर्तिं कृत्वा महाविष्णुं सदाविष्णुमथापि वा। वैष्णवैः पूजितो नित्यं मूर्तित्रयमयासने।132।
शिवप्रियः शिवासक्तः शिवपादार्चने रतः। शिवस्याज्ञां पुरस्कृत्य समे दिशतु मंगलं मे।133।
वासुदेवोऽनिरूद्धश्च प्रद्युम्नश्च ततः परः। संकर्षणः समाख्याताश्चतस्त्रो मूर्तयो हरेः।134।
मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः। रामत्रयं तथा कृष्णो विष्णुस्तुरगवक्त्रकः।135।
चक्रं नारायणस्यास्त्रं पांचजन्यं च शांर्गकाम्। सत्कृत्य शिवयोराज्ञां मंगलं प्रदिशन्तु मे।136।
प्रभा सरस्वती गौरी लक्ष्मीश्च शिवभाविता। शिवयोः शासनादेता मंगलं प्रदिशन्तु मे।137।
इन्द्रोऽग्निश्च यमश्चैव निर्ऋतिर्वरूणस्तथा। वायुः सोमः कुबेरश्चतथेशानस्त्रिशूलधृक।138।
सर्वे शिवार्चनरताः शिवसद्भावभाविताः। सत्कृत्य शिवयोराज्ञां मंगलं प्रदिशन्तु मे।139।
त्रिशूलमथ वज्रं च तथा परशुसायकौ। खड्गपाशांकुशाश्चैव पिनाकश्चायुधोत्तमः।140।
दिव्यायुधानि देवस्य देव्याश्चैतानि नित्यशः। सत्कृत्य शिवयोराज्ञां रक्षां कुर्वन्तु मे।141।
वृषरूपधरो देवः सौरभेयो महाबलः। वडवाख्यानलस्पर्द्धी पंचगोमातृभिर्वृतः।142।
वाहनत्वमनुप्राप्तस्तपसा परमेशयोः। तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु।143।
नन्दा सुनन्दा सुरभिः सुशीला सुमस्तथा। पंच गोमातरस्वेताः शिवलोके व्यवस्थिताः।144।

शिवभक्तिपरा नित्यं शिवार्चनपरायणाः। शिवयोः शासनादेव दिशन्तु मम् वाञ्छितम्।145।
क्षेत्रपालो महातेजा नीलजीमूतसंनिभः। द्रंष्ट्राकरालवदनः स्फुरद्रक्ताधरोज्ज्वलः।146।
रक्तोर्ध्वमूर्द्धजः श्रीमान् भ्रुकुटीकुटिलेक्षणः। रक्तवृत्तत्रिनयनः शशिपन्नगभूषणः।147।
नग्नस्त्रिशूलपाशासिकपालोद्यतपाणिकः। भैरवो भैरवैः सिद्धैर्योगिनीभिश्च संवृतः।148।
क्षेत्रे क्षेत्रसमासीनः स्थितो यो स्थितो यो रक्षकः सताम्। शिवप्रणामपरमः शिवसद्भावभावितः।149।
शिवाश्रितान् विशेषेण रक्षन् पुत्रानिवौरसान्। सत्कृत्य शिवयोराज्ञां स मे दिशतु मंगलम्।150।
तालजंघादयस्तस्य प्रथमावरणेऽर्चिताः। सत्कृत्य शिवयोराज्ञां चत्वारः समवन्तु माम्।151।
भैरवद्याश्च ये चान्ये समन्तात्तस्य वेष्टिताः। तेऽपि मामनुगृहणन्तु शिवशासनगौरवात्।152।
नारदाद्याश्च मुनयो दिव्या देवैश्च पूजिताः। साध्या नागाश्च ये देवा जनलोकनिवासिनः।153।
विनिर्वृत्ताधिकाराश्च महर्लोकनिवासिनः। सप्तर्षयस्तथान्ये वै वैमानिकगणैः सह।154।
सर्वे शिवार्चनरताः शिवाज्ञावशवर्तिनः। शिवयोराज्ञया मह्यं दिशन्तु समकांक्षितम्।155।
गन्धर्वाद्याः पिशाचान्ताातस्त्रो देवयोनयः। सिद्धा विद्याद्याश्च येऽपि चान्ये नभश्चराः।156।
असुरा राक्षसाश्चैव पातालतलवासिनः। अनन्ताद्याश्च नागेन्द्रा वैनतेयादयो द्विजाः।157।
कूष्माण्डाः प्रेतवेताला ग्रहा भूतगणाः परे। डाकिन्यश्चापि योगिन्यः शाकिन्यश्चापि तादृशाः।158।
क्षेत्रारामगृहादीनि तीर्थान्यायतनानि च। द्वीपाः समुद्रा नद्यश्च नदाश्चान्ये सरांसि च।159।
गिरयश्च सुमेर्वाद्याः काननानि समन्ततः। पशवः पक्षिणो वृक्षाः कृमिकीटादयो मृगाः।160।
भुवनान्यपि सर्वाणि भुवनानामधीश्वराः। अण्डान्यावरणैः सार्द्धं मासाश्च दश दिग्गजाः।161।
वर्णाः पदानि मन्त्राश्च तत्त्वान्यपि सहाधिपैः ब्रह्माण्डधारका रूद्रा रूद्राश्चान्ये सशक्तिकाः।162।
यच्च किंचिज्जगत्यस्मिन्दृष्टिं चानुमितं श्रुतम्। सर्वे कामं प्रयच्छन्तु शिवयोरेव शासनात्।163।
अथ विद्या परा शैवी पशुपाश विमोचिनी। पंचार्थ संहिता दिव्या पशु विद्या बहिष्कृता।164।
शास्त्रं च शिव धर्माख्यं धर्माख्यं च तदुन्तरम। शैवारव्यं शिव धर्माख्यं पुराणं श्रुति सम्मितम्।165।

शैवागमाश्च ये चान्ये कामिकाद्याश्चतुर्विधाः। शिवाभ्याम विशेषेण उत्कृत्येह समर्चिता।166।

ताभ्यामेव समाज्ञाता ममाभिप्रेत सिद्धये। कर्मेद मनु मन्यन्तां सफलं साध्वनुष्ठितम्।167।

श्वेताद्या नकुलीशान्ताः सशिष्याश्चापि देशिकाः। तत्संततीया गुरवो विशेषाद् गुरवो मम्।168।

शैवा माहेश्वराश्चैव ज्ञानकर्मपरायणाः। कर्मेदमनुमन्यन्तां सफलं साध्वनुष्ठितम्।169।

लौकिका ब्राह्मणाः सर्वे क्षत्रियाश्च विशः क्रमात्। वेदवेदांगतत्त्वज्ञाः सर्वशास्त्रविशारदाः।170।

सांख्या वैशेषिकाश्चैव यौगा नैयायिका नराः। सौरा ब्राह्मास्तथा रौद्रा वैष्णवाश्चापरे नराः।171।

शिष्टाः सर्वे विशिष्टाश्च शिवशासनयन्त्रिताः। कर्मेदमनुमन्यन्तां ममाभिप्रेतसाधकम्।172।

शैवाः सिद्धान्तमार्गस्थाः शैवाः पाशुपतास्तथा। शैवा महाव्रतधराः शैवाः कापालिकाः परे।173।

शिवाज्ञापालकाः पूज्या ममामि शिवशासनात्। सर्वे मामनुग्रहणन्तु शंसन्तु सफलक्रियाम्।174।

दक्षिणज्ञाननिष्ठाश्च दक्षिणोत्तरमार्गगाः। अविरोधेन वर्तन्तां मन्त्रं श्रेयोऽर्थिनो मम्।175।

नास्तिकाश्चै शठाश्चैव कृतघ्नाश्चैव तामसाः। पाषण्डाश्चातिपापाश्च वर्तन्तां दूरतो मम्।176।

बहुभिः किं स्तुतैरत्र येऽपि केऽपि चिदास्तिकाः। सर्वे मामनुग्रहणन्तु सन्तः शंसन्तु मंगलम्।177।

नमः शिवाय साम्बाय ससुतायादिहेतवे। पंचावरणरूपेण प्रपंचेनावृताय ते।178।

इत्युक्त्वा दण्डवद् भूमौ प्रणिपत्य शिवं शिवाम्। जपेत्पंचाक्षरीं विद्यामष्टोत्तरशतावराम्।179।

तथैव शक्तिविद्यां च जपित्वा तत्समर्पणम्। कृत्वा तं क्षमयित्वेशं पूजाशेषं समापयेत्।180।

एतत्पुण्यतमं स्तोत्रं शिवयोर्हृदयंगमम्। सर्वाभीष्टप्रदं साक्षाद्भक्तिमुक्त्येक साधनम्।181।

य इदं कीर्तयेन्नित्यं ऋणुयाद्वा समाहितः। स विधूयाशु पापानि शिवसायुज्यमाप्नुयात्।182।

गोघ्नश्चैव कृतघ्नश्च वीरहा भ्रूणहापि वा। शरणागतघाती च मित्रविश्रम्भघातकः।183।

दुष्टपापसमाचारो मातृहा पितृहापि वा। स्तवेनानेन जप्तेन तत्तत्पापात् प्रमुच्यते।184।

दुःस्वप्नादिमहानर्थसूचकेषु भयेषु च। यदि संकीर्तयेदेतन्न ततोऽनर्थभागभवेत्।185।

आयुरारोग्यमैश्वर्यं यच्चान्यदपि वाञ्छितम्। स्तोत्रस्यास्य जपे तिष्ठंस्तत्सर्वं लभते नरः।186।

असम्पूज्य शिवं स्तोत्रजपात्फलमुदाहृतम्। सम्पूज्य च जपे तस्य फलं वक्तुं न शक्यते।187।

आस्तामियं फलावाप्तिरस्मिन् संकीर्तिते सति। सार्द्धमम्बिकया देवः श्रुत्वैव दिवि तिष्ठति।188।

तस्मान्नभसि सम्पूज्य देवदेवं सहोमया। कृताजंलिपुटस्तिष्ठन् स्तोत्रमेतदुदीरयेत्।189।

! सम्पूर्णम् !

इसके पाठ करने के फल की प्राप्ति अलग रहे इस स्तोत्र का कीर्तन करने पर इसे सुनते ही माता पार्वती सहित महादेवजी आकाश में आकर खड़े हो जाते हैं। अतः उस समय उमासहित महादेव की आकाश में पूजा करके दोनों हाथ जोड़ खड़ा हो जाय और इस स्तोत्र का पाठ करें।

शिव मानस पूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं। नानारत्नविभूषितं मृगमदामोदांकितं चन्दनम्।

जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा दीपं देव दयानिधे पशुपते हृत्कलिपतं गृह्यताम्।1।

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं भक्ष्यं पंचविधि पयोदधियुतं रम्भाफलं पानकम्।

शाकानामयुतं जलं रूचिकरं कर्पूरखण्डोज्ज्वलं ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरू।2।

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदंगकाहलकला गीतं च नृत्यं तथा।

साष्टांग प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो।3।

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं। पूजा ते विषयोपभोग रचना निद्रा समाधि स्थितिः।।

संचारः पदयोः प्रदक्षिण विधिः स्तोत्राणि सर्वा गिरो। यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।4।

करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वापराधम्।

विहितमविहितं वा सर्वमेतत् क्षमस्व जय जय करूणाब्धे श्री महादेव शम्भो।5।

नित्य महामृत्युंजय हवन : सं0 2066 ज्येष्ठ मास शुल्क पक्ष दशमी 2 जून 2009 मंगलवार से शुरू हुआ जो अनवरत है।

रूद्राभिषेक एवं महामृत्युंजय हवन :
सं0 2066 श्रावण मास कृष्ण पक्ष चतुर्दशी मासशिवरात्रि '20 जुलाई 2009 सोमवार' को रूद्राभिषेक, महामृत्युंजय हवन, कीर्तन एवं सत्संग शुरू किया गया जो अनवरत है।

12 फरवरी 2010 महाशिवरात्रि (शुक्रवार)
सिद्धबाबा द्वारा 11 लीटर गौ दुग्ध द्वारा रूद्राभिषेक, महामृत्यंजय हवन, अखण्ड रामायण पाठ, रात्रि चार पहर अनुष्ठान, शाम 6 बजे 11 लीटर गाय दूध से रूद्राभिषेक, शाम 9 बजे 11 लीटर दही द्वारा रूद्राभिषेक, रात्रि 12 बजे शहद द्वारा रूद्राभिषेक एवं रात्रि 3 बजे 11 लीटर गन्ना रस द्वारा रूद्राभिषेक

13 फरवरी 2010 – अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

निष्काम महामृत्युंजय यज्ञ : 7 अगस्त 2010 (श्रावण मास)
विभिन्न राज्यो से आये हुये शिव भक्तों का समागम,कीर्तन, सत्संग एवं 'महामृत्युंजय अनुष्ठान' के दौरान हुए अनुभवों की चर्चा।

8 से 10 अगस्त 2010 :

रुद्राभिषेक, महामृत्युंजय यज्ञ, कीर्तन, सत्संग और ध्यान साधना का आयोजन हुआ एवं रूद्राभिषेक (रूद्री) नामक पुस्तक भक्तों एवं साधकों में वितरित की गई ।

03 मार्च 2011 महाशिवरात्रि (गुरूवार)

सिद्धबाबा द्वारा 11 लीटर गौ दुग्ध द्वारा रूद्राभिषेक, महामृत्यंजय हवन, अखण्ड रामायण पाठ, रात्रि चार पहर अनुष्ठान, शाम 6 बजे 11 लीटर गाय दूध से रूद्राभिषेक, शाम 9 बजे 11 लीटर दही द्वारा रूद्राभिषेक, रात्रि 12 बजे शहद द्वारा रूद्राभिषेक एवं रात्रि 3 बजे 11 लीटर गन्ना रस द्वारा रूद्राभिषेक

04 मार्च 2011 – अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

28–7–2011 (श्रावण मास) :

विभिन्न राज्यों से आये हुए शिव साधको का समागम, कीर्तन, सत्संग एवं शिव साधकों को महामृत्युंजय अनुष्ठान, महामृत्युंजय मंत्र जप के दौरान हुए अनभवों की चर्चा

29–7–2011 :

ग्यारह ब्राह्मणों द्वारा 101 लीटर दूध से एकादशिनी रूद्राभिषेक एवं शिव साधकों द्वारा पूर्व में किये गये 'महामृत्युंजय अनुष्ठान' का दशाँस हवन

20 फरवरी 2012 महाशिवरात्रि (सोमवार)

सिद्धबाबा द्वारा 11 लीटर गौ दुग्ध द्वारा रूद्राभिषेक, महामृत्यंजय हवन, अखण्ड रामायण पाठ, रात्रि चार पहर अनुष्ठान, शाम 6 बजे 11 लीटर गाय दूध से रूद्राभिषेक, शाम 9 बजे 11 लीटर दही द्वारा रूद्राभिषेक, रात्रि 12 बजे शहद द्वारा रूद्राभिषेक एवं रात्रि 3 बजे 11 लीटर गन्ना रस द्वारा रूद्राभिषेक

21 फरवरी 2012 – अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

-: संचालित कार्यक्रम :-

(14,15,16,17, जुलाई 2012, श्रावण मास)

14-7-2012 : विभिन्न राज्यों से आये हुए शिव भक्तो का समागम, कीर्तन, सत्संग एवं शिव भक्तों को महामृत्युंजय अनुष्ठान, महामृत्युंजय मंत्र जप के दौरान हुए अनुभवो की चर्चा

15,16-7-2012 : शिव भक्तो द्वारा 15-07-2012 को 'महामृत्युंजय अनुष्ठान' (सवा लाख मंत्र जप) का सामूहिक संकल्प, ग्यारह ब्राह्मणों द्वारा 15-07-2012 को गंगा जल (330 लीटर), 16-07-2012 को यमुना जल (330 लीटर) द्वारा एकादशिनी रूद्राभिषेक, महामृत्युंजय मंत्र जप, शिव साधको द्वारा पूर्व में किये गये 'महामृत्युंजय अनुष्ठान' के दशाँस हवन ।

17-7-2012 : ग्यारह ब्राह्मणों द्वारा 141 लीटर गौ दुग्ध से एकादशिनी रूद्राभिषेक, एवं शिव साधकों द्वारा 15-07-2012 को लिए गये संकल्प (महामृत्युंजय अनुष्ठान) का दशांस हवन

18-07-2012 : सिद्ध बाबा द्वारा संकल्पित 20-07-2009 श्रावण मास से प्रत्येक मास शिवरात्रि को शुरू किये गये रूद्राभिषेक, महामृत्युंजय हवन, कीर्तन, सत्संग के तीन साल पूर्ण होने पर उपरोक्त कार्यक्रम की पूर्णाहूति की गयी तथा निर्णय लिया गया कि प्रत्येक वर्ष के श्रावण मास में सभी साधको के सहयोग से रूद्राभिषेक, महामृत्युंजय अनुष्ठान, कीर्तन, सत्संग का आयोजन किया जायेगा।

10 मार्च 2013 महाशिवरात्रि (रविवार)
सिद्धबाबा द्वारा 11 लीटर गौ दुग्ध द्वारा रूद्राभिषेक, महामृत्यंजय हवन, अखण्ड रामायण पाठ, रात्रि चार पहर अनुष्ठान, शाम 6 बजे 11 लीटर गाय दूध से रूद्राभिषेक, शाम 9 बजे 11 लीटर दही द्वारा रूद्राभिषेक, रात्रि 12 बजे शहद द्वारा रूद्राभिषेक एवं रात्रि 3 बजे 11 लीटर गन्ना रस द्वारा रूद्राभिषेक
11 मार्च 2013 - अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

महामृत्युंजय अनुष्ठान

02, 03, 04, 05 अगस्त 2013 (श्रावण मास)
02-8-2013 विभिन्न राज्यों से आये हुए शिव भक्तो का समागम, कीर्तन, सत्संग एवं शिव भक्तों को महामृत्युंजय अनुष्ठान, महामृत्युंजय मंत्र जप के दौरान हुए अनुभवो की चर्चा

-: संचालित कार्यक्रम :-

27 फरवरी 2014 महाशिवरात्रि (गुरूवार)

सिद्धबाबा द्वारा 11 लीटर गौ दुग्ध द्वारा रूद्राभिषेक, महामृत्यंजय हवन, अखण्ड रामायण पाठ, रात्रि चार पहर अनुष्ठान, शाम 6 बजे 11 लीटर गाय दूध से रूद्राभिषेक, शाम 9 बजे 11 लीटर दही द्वारा रूद्राभिषेक, रात्रि 12 बजे शहद द्वारा रूद्राभिषेक एवं रात्रि 3 बजे 11 लीटर गन्ना रस द्वारा रूद्राभिषेक

21 फरवरी 2012 – अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

28 फरवरी 2014 – अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

22, 23, 24, 25 जुलाई 2014 (श्रावण मास)

22-7-2014 विभिन्न राज्यों से आये हुए शिव भक्तो का समागम, कीर्तन, सत्संग एवं शिव भक्तों को महामृत्युंजय अनुष्ठान, महामृत्युंजय मंत्र जप के दौरान हुए अनुभवो की चर्चा

23-7-2014

परमश्रेद्धय पंडित जी श्री कान्ति प्रसाद शर्मा जी, सिद्धबाबा एवं श्री राधामोहन शर्मा जी के सानिध्य में ग्यारह ब्राह्मणों द्वारा 351 लीटर गंगाजल से श्री सिद्धेश्वर महादेव जी का एकादशिनी रूद्राभिषेक किया गया। तथा सभी साधकों द्वारा सिद्धबाबा के मार्गदर्शन में महामृत्युजंय हवन हुआ जिसमें विल्वपत्रों की आहूति दी गई।

शाम को आरती के बाद शिव साधकों को महामृत्यंजय अनुष्ठान के दौरान हुये अनुभवों की चर्चा हुयी एवं परमपूज्य गुरुदेव द्वारा साधकों की जिज्ञासा/प्रश्नों/समस्यों का समाधान बताया गया।

24-7-2014

परमश्रेद्धय पंडित जी श्री कान्ति प्रसाद शर्मा जी, सिद्धबाबा एवं श्री राधामोहन शर्मा जी के सानिध्य में ग्यारह ब्राह्मणों द्वारा 351 लीटर गंगाजल से श्री सिद्धेश्वर महादेव जी का एकादशिनी रूद्राभिषेक किया गया। तथा सभी साधकों द्वारा सिद्धबाबा के मार्गदर्शन में महामृत्युजंय हवन हुआ जिसमें प्रज्वलित कपूर की आहूति दी गई।

शाम को आरती के बाद शिव साधकों को महामृत्यंजय अनुष्ठान के दौरान हुये अनुभवों की चर्चा हुयी एवं परमपूज्य गुरुदेव द्वारा साधकों की जिज्ञासा/प्रश्नों/समस्यों का समाधान बताया गया।

25-7-2014

परमश्रेद्धय पंडित जी श्री कान्ति प्रसाद शर्मा जी, सिद्धबाबा एवं श्री राधामोहन शर्मा जी के सानिध्य में ग्यारह ब्राह्मणों द्वारा 351 लीटर गंगाजल से श्री सिद्धेश्वर महादेव जी का एकादशिनी रूद्राभिषेक किया गया। तथा सभी साधकों द्वारा सिद्धबाबा के मार्गदर्शन में महामृत्युजंय हवन हुआ जिसमें जायफल की आहूति दी गई।

शाम को आरती के बाद शिव साधकों को महामृत्यंजय अनुष्ठान के दौरान हुये अनुभवों की चर्चा हुयी एवं परमपूज्य गुरूदेव द्वारा साधकों की जिज्ञासा/प्रश्नों/समस्यों का समाधान बताया गया।

17 फरवरी 2015 महाशिवरात्रि (मंगलवार)

सिद्धबाबा द्वारा 11 लीटर गौ दुग्ध द्वारा रूद्राभिषेक, महामृत्यंजय हवन, अखण्ड रामायण पाठ, रात्रि चार पहर अनुष्ठान, शाम 6 बजे 11 लीटर गाय दूध से रूद्राभिषेक, शाम 9 बजे 11 लीटर दही द्वारा रूद्राभिषेक, रात्रि 12 बजे शहद द्वारा रूद्राभिषेक एवं रात्रि 3 बजे 11 लीटर गन्ना रस द्वारा रूद्राभिषेक

18 फरवरी 2015 – अखण्ड रामायण पाठ का सभी शिव भक्तों द्वारा हवन, भण्डारा, सिद्धबाबा द्वारा श्रावण मास में पुनः मिलन की प्रार्थना, विर्सजन।

अगला कार्यक्रम – 10, 11, 12 अगस्त 2015 श्रावण मास